उपशास्त्री-II खण्ड साहित्य - तृतीयः पत्रम्

काव्यदीपिका

Date ___/___/_____

प्र० (1) गुणीभूतव्यङ्ग्यस्य किं स्वरूपम् ?

उत्तरम् - अनुत्तमे गुणीभूतव्यङ्ग्यं तु वाच्यतः ।

अर्थात् व्यंग्ये-व्यंग्यार्थे, वाच्यतः वाच्यार्थात्, अनुत्तमे - अनधिकचमत्कारिणि सति गुणीभूतव्यंग्यम्, तच्च मध्यमं काव्यं कथ्यते। यथा -

अत्रासीत् फणिपाशबन्धनविधि शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राऽऽहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लम्भितः
केनाप्यत्र मृगाक्षि ! राक्षसपतेः कृत्ता च कण्ठाटवी ॥

प्र० (2) - अधमकाव्यस्य किं स्वरूपम् ? कति च तस्य भेदाः ?

उत्तरम् - व्यङ्ग्यार्थहीनं काव्यं यत् तत्तु चित्रमिति स्मृतम् ।

चित्रमिति - गुणालंकारयुक्तम्, व्यङ्ग्यार्थहीनम् - स्फुटप्रतीयमानव्यङ्ग्यार्थरहितम्, तच्च अधमं काव्यमुच्यते तत्तु द्विविधं, उक्तञ्च -

शब्दचित्रं वाच्यचित्रं द्विविधं तत्प्रकीर्त्तितम्।

यत्र वाच्यार्थात् शब्दस्य प्रधान्येन चमत्कारित्वं, तत् शब्दचित्रम्। यत्र शब्दात् वाच्यार्थस्य प्राधान्येन चमत्कारित्वं तद् वाच्यचित्रमिति।

Renu Devi
15/09/20

राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

शास्त्री - II खण्ड साहित्य

मेघदूतम्

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य खण्डकाव्यस्योत्तरमेघस्यास्ति । अत्र यक्षः मेघम्प्रति अलकापुर्यां स्वगृहस्थां विरहिणीं निजपत्नीं संकेतेन वर्णयति

व्याख्या :- (हे मेघ!) सहचरे = सहगामिनि, मयि = प्रिये यक्षे, दूरीभूते = दूरसंस्थे, चक्रवाकीमिव = रथाङ्गपक्षिनारीमिव, परिमितकथाम् = अल्पभाषिणीम्, एकाम् = एकाकिनीम्, तां = भवनाभ्यन्तरवर्तिनीं, मे = मम, द्वितीयं = अन्यम्, जीवितं = प्राणं, जानीथाः = जानीहि । गाढोत्कण्ठां = दृढौत्सुक्यां, बालां = अष्टादशवर्षीयां, गुरुषु = दुर्वहेषु, एषु = वर्तमानेषु, दिवसेषु = दिनेषु, गच्छत्सु = व्रजत्सु, शिशिरमथितां = तुषारविनाशितसौन्दर्यां, पद्मिनीम् = कमलिनीम्, वा = इव, अन्यरूपाम् = अन्यस्वरूपाम् जातां = संवृत्ताम्, मन्ये = तर्कयामि, हिमहतपद्मिनीव सा विरहवेदनयाऽन्य स्वरूपा जातेति तर्कयामि ।
अत्र पत्नीजीवितयोरभेदाध्यवसायवर्णनादतिशयोक्तिः "पद्मिनीं वा" इत्यत्रोपमा । उभयो निरपेक्षत्वात् संसृष्टिरलङ्कारो बोध्यः । मन्दाक्रान्ता छन्दः ।

Renu Devi
15/09/20
राधा उमाकान्त सं० महाविद्यालय सुखसेना,
पूर्णिया ।

शास्त्री -I खण्ड साहित्य

अभिज्ञानशाकुन्तलम्

Saathi

Date ___/___/___

तव भवतु बिडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञो वज्रिणं प्रीणयस्व ।
युगशतपरिवर्तानेवमन्योन्य कृत्यैः
नयतमुभय लोकानुग्रहश्लाघनीयैः ॥

उत्तरम् = प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचिता अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतास्ति ।

अस्मिन् श्लोके मारीचः उभययोमिन्द्र दुष्यन्तयोः युवयोः पारस्परिक सहयोगेन विश्व कल्याणं भविष्यतीत्याशंसन् कश्यप आशिषं प्रयुङ्क्ते - विडौजाः - वेवेष्टीति विट् = व्यापकम् ओजः = बलं तेजो वा यस्य सः यद्वा विशति भिनत्ति रिपूनिति विडम् = शत्रुभेदकम् ओजो यस्य स विडौजाः = इन्द्रः तव = भवतो दुष्यन्तस्य प्रजासु = जनेषु राष्ट्रे वा प्राज्यवृष्टिः प्राज्या = प्रभूता वृष्टिः = वर्षणं यस्य स प्राज्य वृष्टिः पर्याप्तवर्षः भवतु = काले काले प्रभूतं जलवर्षणेन भूमण्डलं पुष्यतु । त्वमपि = भवान् दुष्यन्तोऽपि विततयज्ञः विततः = विस्तीर्णाः यज्ञाः = इष्टयो येन स विततयज्ञः = विस्तृतानेकयज्ञः, आहृतानेकाश्वमेधादियागः वज्रिणं = इन्द्रं प्रीणयस्व = प्रसादय उभयलोकानुग्रहश्लाघनीयैः = देवलोक-भूलोकोपकारकप्रशंसनीयैः, अन्योन्यकृत्यैः अन्योन्यस्य परस्परस्य कृत्यैः = यज्ञादिभिः सुवर्षणादिभिश्च कार्यैः, युगशत-परिवर्तान् युगानां = कलिद्वापरत्रेतासत्ययुगानां शतानि युग-शतानि तेषां परिवर्ताः = परिवृत्तयः इति युगशतपरिवर्तास्तान् युगशतपरिवर्तान् = अनेक युग सहस्र परिवर्तनानि नयतं = गमयतम् ।

Renu Devi
15/09/20